(538) " चुट्ट अल्पीभावे " (X-चुरादिः. 1560. अक. सेट्. उभ.)

चुट्टकः-ट्टिका, चुचुट्टयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुट्टयतिवत् (207) बोध्यानि । [A]चुट्टितः ।

(539) "चुड संवरणे" (VI-तुदादिः-1392. सक. सेट्. पर. कुटादिः।)

चोडकः-डिका, चोडकः-डिका, चुचुडिषकः-षिका, चोचुडकः-डिका ; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुटतिवत् (204) ज्ञेयानि । स्त्रियां भावादौ भिदादि (3-3-104) पाठात् अङ्, उपधायाः दीर्घश्च ; चूडा-इति भवति । [B]चुडितम् ।

(540) " चुडि अल्पीभावे " (I-भ्वादिः-325. अक. सेट्. पर.)

चुण्डकः-ण्डिका, चुण्डकः-ण्डिका, चुचुण्डिषकः-षिका, चोचुण्डकः- ण्डिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुण्ठतिवत् (209) ज्ञेयानि । क्विपि [C]चुन्-चुण्डौ-चुण्डः इति भवति ।

(541) " चुड्ड भावकरणे " (I-भ्वादिः-347. अक. सेट्. पर.)

दोपधोऽयम् । भावकरणम्= अभिप्रायाविष्करणम् ।

चुड्डकः-ड्डिका, चुड्डकः-ड्डिका, चुचुड्डिषकः-षिका, चोचुड्डकः-ड्डिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककड्डतिवत् (156) बोध्यानि । घञि चुड्डः[D] ।

(542) " चुद सञ्चोदने " (X-चुरादिः-1592. सक. सेट्. उभ.)

सञ्चोदनम्=प्रश्नः, प्रेरणं वा । प्रश्ने द्विकर्मकः ।

---

A. 'सा पूतना च शिशुभक्षणकुट्टनोत्का जज्ञे प्रचुट्टितरूपेण विचुट्टिताघा ।'
धा. का. 3. 16.

B. 'क्षौमेण स्फुडितं स्रजा निचुडितं (चुलितं) चाभ्रोच्चशोभं धनुः
गेहक्रोडतले स मोदकुलितो दृष्ट्वाऽगुरिष्टं क्षणात् ।' धा. का. 2. 82.
[लडयोरभेदात् निचुलितम् इति भवति ।]

C. 'अचुचुन्मुण्डितपुण्डरीकमृत्सरःश्रियो रुण्डकलुण्डनोज्झितान् ।' धा. का. 1.43.

D. 'प्रशण्ठिताघैरनुलुण्ठकैर्हरेः प्रचुड्डबोधाद्भिरतीव शोभितान् ॥' धा. का. 1.45.